अर्थ—ज्योतिषीनिकी गतिविशेषकूं जनावनेनिमित्त कहै है। सूत्र—

मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥ १३ ॥

(श्रीउमास्वामिकृत)

अर्थ—मनुष्यलोकके विषैं मेरुकी प्रदक्षिणारूप है नित्यगति जिनकी ऐसे ज्योतिषी देव है ।

वार्तिक– मेरुप्रदक्षिणावचनं गत्यंतरनिवृत्यर्थं ॥ १ ॥ टीका– मेरोः प्रदक्षिणा मेरुप्रदक्षिणा इत्युच्यते किमर्थं गत्यंतरनिवृत्यर्थं विपरीता गतिर्मा भूत् ॥ अर्थ–मेरुकी जो प्रदक्षिणा सो मेरु प्रदक्षिणा है ऐसे कहिए है । प्रश्न–ऐसैं कहा निमित्त कहिये है । उत्तर–गत्यंतरकी निवृत्तिके अर्थ करिये है । अर्थात विपरीतगति मति है । ॥ १ ॥

वार्तिक–गते क्षणेक्षणेऽन्यत्वान्नित्यत्वाभाव इतिचेन्नाऽभीक्ष्ण्यस्य विवक्षितत्वात् ॥ २ ॥ टीका–अयं नित्यशब्द कूटस्थेष्वविचलेषु भावेषु वर्तते गतिश्च क्षणेक्षणेऽन्येतितोऽस्या नित्येति विशेषणं नोपपद्यत इतिचेन्न किंकारणमाभीक्ष्ण्यस्य विवक्षितत्वात । यथा नित्यप्रहसितो नित्यप्रजल्पित इति आभीक्ष्ण्य गम्यते इति एवमिहापि नित्यगतय अनुपरतगतय इत्यर्थ ॥

अर्थ–प्रश्न–यो नित्यशब्द कूटस्थ अविचलभाव जे हैं तिनकै विषैं प्रवर्तै है । अर गति क्षणक्षणमैं अन्यअन्य हैं । तातैं याको नित्य विशेषण नहीं उत्पन्न होय है । उत्तर–सो नहीं है ॥ प्रश्न–कहा कारण । उत्तर–निरंतरपणाका विवक्षितपणातैं । सो जैसे कहिये है कि यो पुरुष नित्य प्रहसित है । तथा नित्यप्रजल्पित है ऐसैं कहने सैं निरंतरपणानै जणावै है । ऐसैं ही इहां भी नित्यगतय पद जो है सो निर्विघ्न गतिमान है । ऐसा जनावनेकै अर्थ है ।

वार्तिक–अनेकान्ताच्च ॥ ३ ॥ टीका–यथा सर्वभावेषु द्रव्यार्थादेशात्स्यान्नित्यत्वं पर्यायार्थादेशात्स्यादनित्यत्वं। तथा गतावपीति नित्यमविरुद्धं

अर्थ — जैसैं सर्वभावनिकै विषैं द्रव्यार्थका आदेशतैं कथंचित् नित्यपणौ अर पर्यायार्थका आदेशतैं कथंचित् नित्यपणौ है । तैसैंगतिकै विषैंभी नित्यपणौ अविरुद्ध है । क्योंकि उनकी गति अविच्छेदरूप है यातैं ।

वार्तिक—नृलोकग्रहणं विषयार्थं ॥ ४ ॥ टीका–ऋर्धतृतीयेषु

द्वीपेषुद्वयोश्च समुद्रयोर्ज्योतिष्कास्ते मेरुप्रदक्षिणा नित्यगतय.नान्ये इति विषयावधारणार्थं नृलोकग्रहणं क्रियते । अर्थ — जे ढाईद्वीपमें अर दोय समुद्रनिमें ज्योतिषीहैं ते मेरुप्रदक्षिणारूप नित्यगतिमान है । अन्य स्थानमें गतिमान नहीं है । ऐसा विषयका अवधारणके अर्थ नृलोक पदको ग्रहण करिए है ॥ ४ ॥

वार्तिक—गतिकारणाभावादयुक्तिरितिचेन्न गतिरताभियोग्य देववहनात् ॥ ५ ॥ टीका—इत्यन्यमतमिह लोके भावानां गतिः कारणवती दृष्टा न च ज्योतिष्कविमानानां गतेः कारणमस्तितस्तदयुक्तिरितिचेन्न किं कारणं गतिरताभियोग्यदेववहनात् । गतिरताहि आभियोग्य देवा वहन्तीत्युक्तं पुरस्तात् ॥ अर्थ— प्रश्न—यालोककै विषैंपदार्थनिकी गति कारणमानदेखी अर ज्योतिषीनिके विमाननिकैंगतिको कारण नहीं है तातैं गतिविशेषण अयुक्ति है । उत्तर—सो नहीं है । प्रश्न—कहा कारण । उत्तर—गतिमें है रति जिनकै ऐसैं आभियोग्यदेवनिका धारणपणातैं । निश्चय करि गतिमें रतिमान आभियोग्यदेव धारण करै है । ऐसें पूर्वे कह्यो है ॥ ५ ॥

वार्तिक—कर्मफलविचित्रभावाच्च ॥६॥ टीका—कर्मणां हि फलं वैचित्र्येण पच्यते ततस्तेषां गतिपरिणतिमुखेनैव कर्मफलमवबोद्धव्यं। एकादशभिर्योजनशतैरेकविंशैर्मेरुमप्राप्य ज्योतिष्का प्रदक्षिणाश्चरंति । तत्र जंबूद्वीपे द्वौसूर्यौ द्वौचंद्रमसौ षट् पंचाशन्नक्षत्राणि षट् सप्तत्यधिकं ग्रहशतं एकं कोटीकोटिशतसहस्रं त्रयस्त्रिंशत्कोटीकोटिसहस्राणि नवकोटीकोटिशतानि पंचाशच्च कोटीकोट्यस्तारकाणां । लवणोदे चत्वारः सूर्याश्चत्वारश्चंद्राः नक्षत्राणां शतं द्वादश ग्रहाणां त्रीणिशतानि द्वापंचाशानि द्वे कोटीकोटिशतसहस्रे सप्तषष्टिः कोटीकोटिसहस्राणि नव च कोटीकोटिशतानि तारकाणां धातकीखण्डे द्वादशसूर्याः । द्वादशचंद्रा । नक्षत्राणां त्रीणि शतानि षड्विंशानि ग्रहाणां सहस्रं षट्पंचाशं

अष्टौ कोटीकोटिशतसहस्राणि सप्तत्रिंशच्च कोटीकोटिशतानि तारकाणां । कालोदे द्वाचत्वारिंशदादित्याः द्वौ चत्वारिंशचंद्राः एकादश नक्षत्रसप्तानि षट् सप्तत्यधिकानि षड्त्रिंशद्ग्रहशतानि षण्णवत्यधिकानि अष्टाविंशतिः कोटीकोटिशतसहस्राणि द्वादश कोटीकोटिसहस्राणि नवकोटीकोटिशतानि पंचाशत्कोटीकोट्यस्तारकाणां । पुष्करार्धे द्वासप्तति सूर्या द्वासप्ततिश्चन्द्रा द्वे नक्षत्रसहस्रे षोडश त्रिषष्ठि । महशतानि षड्विंशानि अष्टचत्वारिंशत्कोटीकोटिशतसहस्राणि द्वाविंशतिः कोटीकोटिसहस्राणि द्वे कोटीकोटिशते तारकाणां । बाह्ये पुष्करार्धेच ज्योतिषामियमेव संख्यतत-श्चतुर्गुणाः पुष्करवरोदे, तत परा द्विगुणाद्विगुणा ज्योतिषां संख्यावसेया जघन्यं तारकान्तरं गव्यूतसप्तभागः । मध्यं पंचाशत्गव्यूतानि । उत्कृष्टं योजनसहस्रं । जघन्यं सूर्यान्तरं चन्द्रांतरं च नवनवति. सहस्राणि योजनानां षट्शतानि चत्वारिंशदधिकानि उत्कृष्टमेकं योजनशतसहस्र षट्शतानि षष्ठ्युत्तराणि । जंबूद्वीपादिषु एकैकस्य चंद्रमसः षट्षष्टि कोटीकोटिसहस्राणि नवकोटीकोटिशतानि पंचसप्ततिश्च कोटीकोट्य तारकाणामष्टाशीतिर्महाग्रहा । अष्टाविंशति नक्षत्राणि । परिवार. सूर्यस्य चतुरशीतिमण्डलशतमशीतिर्योजनशतं जंबूद्वीपस्यान्तरमवगाह्य प्रकाशयति तत्र पंचषष्ठिरभ्यन्तरमण्डलानि लवणोदस्यांतस्त्रीणि त्रिंशानि योजनशतान्यवगाह्य प्रकाशयति । तत्र मण्डलानि बाह्यान्येकोनविंशतिशतं द्वियोजनमेकैकमण्डलान्तरं द्वे योजने अष्टचत्वारिंशद्योजनैकषष्ठिभागाश्च एकैकमुद्गांतरं चतुश्चत्वारिंशद्योजनसहस्रैरष्टाभिश्चशतैर्विंशत्याप्यमेरुं सर्वाभ्यंतरमण्डलं सूर्य प्रकाशयति । तस्य विष्कंभो नवनवतिः सहस्राणिषट्शतानिचत्वारिंशानि योजनानां तदाहनि मुहूर्ताः अष्टादश भवंति । पंच सहस्राणि द्वे शते एकपंचाशद्योजनानां एकान्नत्रिंशद्योजनषष्टिभागाश्च मुहूर्तगतिस्तत्र सर्वबाह्यमण्डले चरन् सूर्य पंचचत्वारिंशत्सहस्त्रैस्त्रिभिश्चशतैस्त्रिंशैर्योजनानां मेरुमप्राप्य भासयति । तस्य विष्कम्भ एकं शतसहस्रं षट्शतानिषष्ठ्यधिकानियोजनानां तदा दिवसस्य द्वादशमुहूर्ता.पंच-

सहस्राणि त्रीणि शतानिपंचोत्तराणि योजनानां पंचदशयोजनषष्ठिभागाश्च मुहूर्तगतिक्षेत्रं तदा एकत्रिंशद्योजनसहस्रेष्वष्टसु च योजनशतेष्वर्धद्वात्रिंशे-षुस्थितो दृश्यते सर्वाभ्यन्तरमण्डले दर्शनविषयपरिमाणं प्रागुक्तं मध्ये हानि-वृद्धिक्रमो यथागमंवेदितव्यः । चन्द्रमण्डलानि पंचदशद्वीपावगाहः । समुद्रा-वगाहश्चसूर्यवद्वेदितव्यः द्वीपाभ्यंतरे पंचमण्डलानि समुद्रमध्ये दश सर्ववाह्या-भ्यन्तरमण्डलविष्कंभविधिःमेरुचंद्रांतरप्रमाणंच सूर्यवत् प्रत्येतव्यं पंचदशानां मण्डलानामन्तराणि चतुर्दश ॥ तत्रैकैकस्यमण्डलान्तरस्य प्रमाणं पंच-त्रिंशद्योजनानि योजनैकषष्ठिभागास्त्रिंशत् तद्भागस्य चत्वारः सप्तभागाः । ॥ ३५–३०–४ ॥ सर्वाभ्यंतरमण्डले पंच सहस्राणि त्रिसप्तत्यधिकानि योजनानां सप्तसप्ततिर्भागशतानि चतुश्चत्वारिंशानि मण्डलं त्रयोदशभिर्भा-गसहस्रैः सप्तभिश्चभागशतैः । पंचविंशैस्थित्वावशिष्टानि चंद्रः एकैकेन मुहूर्तेन गच्छति सर्ववाह्यमण्डले पंच सहस्राणि शतं च पंचविंशं योज-नानामेकान्नसप्ततिर्भागशतानि नवत्यधिकानि मण्डलं त्रयोदशभिर्भागस-हस्रैः सप्तभिश्चभागशतैः पंचविंशैस्थित्वाऽवशिष्टानि चन्द्रः एकैकेन मुहूर्तेन गच्छति । दर्शनविषयपरिमाणं सूर्यवद्वेदितव्यं हानिवृद्धिविधानंच यथागममवसेयं ॥ पंचयोजनशतानि दशोत्तराणि सूर्याचन्द्रमसोश्चारक्षे-त्रविष्कंभः

अर्थ—अथवा निश्चयकरि कर्मनिको काल विचित्रपर्णा करि पचि है। तातैं तिनकै गतिपरिणतिमुखकरिही कर्मको फल जानने योग्य है । अर ग्यारासै इकवीस योजन मेरुतैं छांडि ज्योतिषी प्रदक्षिणाकरि विचरै है । तिनमैं जंबूद्वीपकैविषैं दोय सूर्य दोय चन्द्रमा है । अर छप्पन नक्षत्र हैं । अर एकसौ छिहत्तर ग्रह है । अर एक लाख कोटाकोटि अर तेईस हजार कोटाकोटि अर नवसै कोटाकोटि अर पचास कोटाकोटि तारानिको प्रमाण है ।

अर लवण समुद्रकै विषैं चार सूर्य चार चंद्रमा है । अर नक्षत्रनि

की संख्या एकसौ बारा है। अर ग्रहनिको प्रमाण तीनसैं बावन है। अर तारानिको प्रमाण दोय लाख कोटाकोटि अर सहसठि हजार कोटाकोटि अर नवसैं कोटाकोटि है॥

अर धातकी खण्डके विषैं द्वादश सूर्य अर द्वादश चन्द्रमा हैं। अर नक्षत्रनिको प्रमाण तीनसैं छत्तीस है। अर ग्रहनिको प्रमाण एक हजार छप्पन है अर तारा आठ लाख कोटाकोटि अर सैंतीससैं कोटाकोटि है।

अर कालोदधि समुद्रकैविषैं बियालीस सूर्य अर बियालीस ही चन्द्रमा है। अर अट्ठाईस लाख कोटाकोटि अर द्वादश हजार कोटाकोटि तारा हैं।

अर पुष्करार्धके विषैं बहत्तरि सूर्य हैं। अर बहत्तरही चन्द्रमा है। अर दो हजार सोला नक्षत्र हैं। अर छिरेपठिसैं छत्तीस ग्रह है अर अडतालीस लाख कोटाकोटि अर बाईस हजार कोटाकोटि अर दोयसैं कोटाकोटि तारा है।

अर बाह्य पुष्करार्धकैविषैं ज्योतिषीनिकी संख्या इतनीही है। तातैं पुष्करवर द्वीपकैविषैं चतुर्गुण है। तातैं परैं द्विगुण ज्योतिषीनिकी संख्या जाननी॥ अर तारकानिकै जघन्य अंतर एक कोशका सतमां भाग मात्र है। मध्य अंतर पचास मात्र है। अर उत्कृष्ट अंतर एक हजार योजन प्रमाण है। अर सूर्यनिकै जघन्य अंतर तथा चन्द्रमानिकै जघन्य अंतर निन्याणवै हजार छसै चालीस योजन प्रमाण है। अर उत्कृष्ट अंतर एक लाख छसै साठि योजन प्रमाण है। अर जंबूद्वीपादिकनिकैविषैं एक एक चंद्रमाकै तारकानिकी छासठि हजार कोटाकोटि अर नवसैं कोटाकोटि अर पिचेतर कोटाकोटि है सो। अर अठ्यासी महाग्रह है सो। अर अट्ठाईस नक्षत्र है। अर सूर्यका एक सौ चौरासी मण्डल-

रूप मार्ग है । तिनमैं सौं अस्सी योजन तौ जंबूद्वीपके मध्य अवगाहन करि प्रकासै है । तहां पैंसठि अभ्यन्तर मण्डल है । अर लवण समुद्रके विषै तीनसै तीस योजन अवगाहन करि प्रकासै है । तहां एक सौ उगणीस बाह्य मण्डल है । अर एक एक मण्डलकै दोय योजन प्रमाण अंतर है । अर दोय योजन अर अडतालीश योजनका इकसठिमां भाग प्रमाण एक एक उदयांतर स्थान है । अर चवालीश हजार आठसैं बीस योजन मेरुसैं दूरि होयकरि सर्व अभ्यन्तर मण्डलनै प्राप्त होय सूर्य प्रकाशै है । ताको चौडापणौ निन्याणवै हजार छसै चालीस योजन को है । योही सूर्यान्तर है कि दोऊ सूर्यनिकै अंतर भी इतनैंहि है । अर या समय दिनमान अष्टादश मुहूर्त प्रमाण है । अर पांच हजार दोय सै इकावन योजन अर उगणीश योजनका साठिमां भाग प्रमाण एक मुहूर्तमैं गमन क्षेत्र है । बहुरि सर्व सर्वबाह्य मण्डलमैं गमन करतौ सूर्य चौपन हजार तीन सै तीश योजन मेरुनैं नहीं प्राप्त होय प्रकासै है । ताको चौडापणौं एकलाख छसै साठि योजन प्रमाण है । अर या समय दिनमान द्वादशमुहूर्त प्रमाण है । तहां पांचहजार तीनसैं पांच योजन अर पंद्रायोजन का साठिमां भागप्रमाण एक मुहूर्तमैं गमनक्षेत्र है । अर या समय सर्व अभ्यतर मण्डलकैविषैं इकतीश हजार आठसै साडा बत्तीस योजनकै विलैं तिष्ठतो सूर्य दीखै है ।

भावार्थ--भरतनिवासी एकतीस हजार आठसे साडा बत्तीस योजन परैं सर्व अभ्यतर मण्डलमैं दीखै है । अर दर्शनको विषयपरिमाण पूर्वं दूसरी अध्यायमैं कह्योही है । अर मध्यके मण्डलनिकै विषै हानि वृद्धिको अनुक्रम आगमकै अनुकूल जानने योग्य है । अर चन्द्र मण्डल पंचदश है । अर द्वीपको अवगाह तथा समुद्रको अवगाह सूर्यवत् जानने योग्य है कि द्वीपके मध्य तो पांच मण्डल है । अर समुद्रके मध्य दश मण्डल है । अर सर्व अभ्यन्तर मण्डलका विष्कंभको विधि अर मेरुतैं चन्द्रमाकै अंतरको प्रमाण सूर्यवत् जानने योग्य है । अर ...

रूप मार्ग है । तिनमैं सौं असी योजन तौ जंबूद्वीपकै मध्य अवगाहन करि प्रकासै है । तहां पैंसठि अभ्यन्तर मण्डल है । अर लवण समुद्रकै विषै तीनसै तीस योजन अवगाहन करि प्रकासै है। तहां एक सौ उगणीस बाह्य मण्डल है। अर एक एक मण्डलकै दोय योजन प्रमाण अंतर है । अर दोय योजन अर अडतालीश योजनका इकसठिमां भाग प्रमाण एक एक उदयांतर स्थान है। अर चवालीश हजार आठसैं बीस योजन मेरुतै दूरि होयकरि सर्व अभ्यन्तर मण्डलनै प्राप्त होय सूर्य प्रकाशै है। ताको चौडापणौ निन्याणवै हजार छसै चालीस योजन को है । योही सूर्यान्तर है कि दोऊ सूर्यनिकै अंतर भी इतनेहि है। अर या समय दिनमान अष्टादश मुहूर्त प्रमाण है। अर पांच हजार दोय सै इक्कावन योजन अर उगणीश योजनका साठिमां भाग प्रमाण एक मुहूर्तमैं गमन क्षेत्र है। बहुरि इवै सर्वबाह्य मण्डल्मैं गमन करतौ सूर्य चौपन हजार तीन सै तीश योजन मेरुतै नहीं प्राप्त होय प्रकासै है। ताको चोडापणौ एकलाख छसै साठि योजन प्रमाण है। अर वा समय दिनमान द्वादशमुहूर्त प्रमाण है। तहां पांचहजार तीनसैं पांच योजन अर पंद्रायोजन का साठिमां भागप्रमाण एक मुहूर्तमैं गमनक्षेत्र है । अर वा समय सूर्य अभ्यतर मण्डलकै विषै इकतीश हजार आठसै साडा बचीस योजनकै विलै तिष्ठतो सूर्य दीखै है ।

भावार्थ--भरतनिवासी एकतीस हजार आठसै साडा बत्तीस योजन परैं सर्व अभ्यतर मण्डलमें दीखै है । अर दर्शनको विषयपरिमाण पूर्वे दूसरी अध्यायमैं कह्योही है। अर मध्यके मण्डलनिकै विषै हानि वृद्धिको अनुक्रम आगमकै अनुकूल जानने योग्य है । अर चन्द्र मण्डल पंचदश है। अर द्वीपको अवगाह तथा समुद्रको अवगाह सूर्यवत् जानने योग्य है कि द्वीपके मध्य तो पांच मण्डल है। अर समुद्रके मध्य दश मण्डल है। अर सर्व अभ्यन्तर मण्डलका विष्कंभकी विधि अर मेरुतैं चन्द्रमाकै अंतरको प्रमाण सूर्यवत् जानने योग्य है । अर पंचदश

मण्डलनिके अन्तर चतुर्दश है। तिनमैं एक एक मण्डलका अन्तरको प्रमाण पैंतीस योजन अर एक योजनका इकसठि भाग करिये तिनमैं तीस भाग अर तिन भागनिमैंसूं एक भागके सात भाग करिये तिनमैंसूं चार भाग प्रमाण है। अर सर्व अभ्यंतर मण्डलमैं पांच हजार तिहत्तर योजन अर सात हजार सातसै चवालीसका तेरा हजार सातसै पचीशमां भागप्रमाण स्थिति रहिकरि चंद्रमा अवशेष क्षेत्रनैं एक एक मुहूर्त करि गमन करै है।

भावार्थ-सर्व अभ्यन्तरमण्डलमैं गमन करता चंद्रमाके एक मुहूर्तमैं पांचहजार तिहत्तर योजन अर सात हजार सातसै चवालीसका तेरा हजार सातसै पचीशमां भाग प्रमाण चारक्षेत्र है। अर सर्वबाह्य मण्डलकेविषैं पांच हजार एक सौ पचीश योजन अर छै हजार नवसै निन्वैका तेरा हजार सातसै पचीशमां भाग प्रमाण स्थिति रहिकरि चंद्रमा अवशेष क्षेत्रनैं एक एक मुहूर्तकरि गमन करै है।

भावार्थ-सर्व बाह्य मण्डलमैं गमन करता चंद्रमाके एक मुहूर्तमैं पांच हजार एकसो पच्चीस योजन अर छै हजार नव्वै निन्वैका तेरा हजार सातसै पच्चीशमां भाग प्रमाण चारक्षेत्र है। अर दर्शनका विषयको प्रमाण सूर्यवत् जानने योग्य है। अर हानिवृद्धिको विधान आगमके अनुकूल जानने योग्य है। अर पांच सै दश योजन सूर्यचन्द्रमाको चार-क्षेत्र चौडो है ॥ ६ ॥ १३ ॥

अब चौदमां सूत्रकी उत्थानिका कहै है-

गतिमज्ज्योतिःसंबन्धेन व्यवहारकालप्रतिपत्त्यर्थमाह ॥

अर्थ-गतिमान ज्योतिषीनिका सम्बन्धकरि व्यवहार कालकी प्रतिपत्तिके अर्थ कहै है-

तत्कृतः कालविभागः ॥ १४ ॥

टीका-तदिति किमर्थं। अर्थ-तिन ज्योतिषीनिके कियो कालको

विभाग है। प्रश्न-तत् ऐसो शब्द कहा निमित्त है। उत्तर-या वार्तिक-

गतिमज्ज्योतिःप्रतिनिर्देशार्थं तद्वचनं ॥ १ ॥

टीका—गतिमतां ज्योतिषां प्रतिनिर्देशार्थं तदित्युच्यते नहि केवलगत्या नापि केवलैर्ज्योतिर्भिः कालः परिच्छिद्यते अनुपलब्धेरपरिवर्तनाच्च ज्योतिःपरिवर्तनलभ्योहि कालपरिच्छेदः। कालो द्विविधो व्यावहारिको मुख्यश्च तत्र व्यावहारिकः कालविभागस्तत्कृतः। समयावलिकादिर्व्यापृतः। क्रियाविशेषपरिच्छिन्नः अन्यस्य परिच्छिन्नस्य परिच्छेदहेतुः मुख्योन्यो वक्ष्यमाणलक्षणः। आह न मुख्यः कालोऽस्ति सूर्यादिगतव्यतिरिक्तो लिंगाभावात्। अपिच कलानां समूहः कालः कलाश्च क्रियावयवाः। किंच।

अर्थ—गतिमान ज्योतिषीनिकी क्रिया कालविभागकूं जनावनेके अर्थ तत् ऐसो शब्द कहिये है। अर निश्चयकरि केवल गतिकरि भी काल नहीं जानिये है। अर केवल ज्योतिषीनिकरिभी काल नहीं जानिये है क्योंकि अनुपलब्धितैं कि प्रत्यक्ष नहीं दीखनेतैं अर परिवर्तनतैं कालकी सत्ता नहीं मालूम होय है।

अर्थात्-काल प्रत्यक्ष भी नहीं दीखै है। अर कालका पलटना भी नहीं दीखै है। यातैं ज्योतिषीनिका परिवर्तन करि ही कालको जानना है। सो काल दोय प्रकार है कि एक व्यवहारिक है दूसरा मुख्य है। तिनमैं व्यवहारिक कालको विभाग ज्योतिषीनिकी गति करि समय आवली आदि क्रिया विशेष करि जान्यूं ऐसो व्याख्यान कियो सो अन्य अज्ञात जो मुख्य काल ताके जाननेको हेतु है। अर दूसरो मुख्य काल वक्ष्यमाणलक्षण है॥ प्रश्न-सूर्य आदिकी गतितैं भिन्न मुख्य काल नहीं है। क्योंकि वाका लिंगको अभाव है यातैं। अर और सुनूं कि काल शब्दकी निरुक्ति ऐसी है कि—कलानां समूहः कालः। याको अर्थ ऐसो है कि कलाको जो समूह सो काल है। अर कला जे है ते क्रियाके अवयव है॥ १॥ किंच वार्तिक—

पंचास्तिकायोपदेशात् ॥ २ ॥

टीका—पंचैवास्तिकाया आगमे उपदिष्टाः । न षष्ठः । ततो न मुख्य कालोऽस्तीति अपरीक्षिताभिधानमेतत् यत्तावदुक्तं लिंगाभावान्नास्ति मुख्य काल इत्यत्रोच्यते क्रियायो काल इति गौणव्यवहारदर्शनात् मुख्य-सिद्धि । योयमादित्यगमनादौ क्रियेतिरूढे काल इति व्यवहारः काल-निर्वर्तनापूर्वक मुख्यस्य कालस्यास्तित्वं गमयति नहि मुख्ये गव्यसति वाहीके गौणे गोशब्दव्यवहारो युज्यते ।

अर्थ—पांचहि अस्तिकाय आगमके विषैं उपदेशकरे है । अर छठो नहीं कह्यो है तातैं मुख्य काल नहीं है । उत्तर—यो अपरीक्षिताभिधान है । सो ऐसें है कि—प्रथम तौ लिंगका अभावतें मुख्य काल नहीं है । इहां उत्तर कहिये है कि क्रियाकै विषैं काल है ऐसा गौण व्यवहारका दर्शनतें मुख्यकी सिद्धि है । अर जो या आदित्यगमन आदि कै विषैं क्रिया है सो रूढितैं व्यवहारकाल है सो कालकी निर्वर्तनापूर्वक होतो संतो मुख्य कालका अस्तित्वनें जनावै । क्यौंकि मुख्य गौनें नहीं होतां सन्तां गौणभूत वाहीके विषैं गौशब्दको व्यवहार नहीं योग्य होय है ॥ २ ॥ वार्तिक—

॥ अतएव न कलासमूह एव कालः ॥

टीका—अतएव कुतएव मुख्यस्य कालस्यास्तित्वादेव कलानां समूहएव काल इति व्यपदेशो नोपपद्यते कल्प्यते क्षिप्यते प्रेर्यते येन क्रियावद्द्रव्यं स कालस्तस्य विस्तरेण निर्णय उत्तरत्र वक्ष्यते ।

अर्थ—यातैंही अस्तित्वपणातैं ही कलाको समूह ही काल है ऐसो उपदेश नहीं उत्पन्न होय है । अर काल शब्दकी निरुक्ति ऐसी है कि—कल्प्यते क्षिप्यते प्रेर्यते येन क्रियावद्द्रव्यं स कालः । याको अर्थ ऐसो है कि जाकरि क्रियावान द्रव्यनें कलना करिये तथा स्थापन करिबे

अथवा प्रेरणा करिये सो काल है। ताको विस्तारकरि निर्णय आगामी कहैंगे ॥ २ ॥ वार्तिक —

प्रदेशप्रचयाभावादस्तिकायेष्वनुपदेशः ॥ ३ ॥ टीका — प्रदेश-प्रचयोहि कायः । स एषामस्ति ते अस्तिकाया इति जीवादय पंचैवोपदिष्टाः । कालस्य त्वेकप्रदेशत्वादस्तिकायत्वाभावः । यदि च'स्तत्व मेवास्य न स्यात् षट्द्रव्योपदेशो न युक्त स्यात् कालस्यहि द्रव्यत्वमस्यागमे परलक्षणाभावः स्वलक्षणोपदेशसद्भावात् ॥

अर्थ—निश्चय करि प्रदेशनिको प्रचय जो है सो काय है । अर जाकै काय है सो अस्तिकाय है। यातै जीवादिक पाचही अस्तिकाय-रूप उपदेश किया अर कालकै एकप्रदेशपणातैं अस्तिकायपणाको अभाव है। अर जो निश्चय करि याको अस्तित्व ही नहीं है तौ षट्-द्रव्यको उपदेश युक्त नहीं है। यातैं निश्चयकरि कालकै द्रव्यपणौं आगम कैविषैं है। क्योंकि पर जे जीवादिक तिनका लक्षणको अभाव अर अपना लक्षणका उपदेशको सद्भाव है यातैं ॥ १३ । १४ ॥

अबैं पनरमां सूत्रकी उत्थानिका कहै हैं —

इतरत्र ज्योतिषामवस्थाप्रतिपादनार्थमाह—

अर्थ — मानुषोत्तर पर्वतकै बाहिरका क्षेत्रमें ज्योतिषीनिकी व्यवस्था का प्रतिपादनकै अर्थ कहै है। सूत्र—

॥ बहिरवस्थिताः ॥ १५ ॥

टीका—बहिरित्युच्यते कुतो बहि । नृलोकात् कथमवगम्यते अर्थ-वशाद्विभक्तिपरिणाम इति ।

अर्थ—मनुष्यक्षेत्रतै बाहिर ज्योतिषी हैं ते यथाऽवस्थित हैं । या सूत्रमें बहिर पद कहिये है तातैं प्रश्न करिये है कि—काहेतै बाहिर है? । उत्तर—मनुष्य लोकतैं बाहिर है सो यथावस्थित है ॥ प्रश्न— कैसैं जानिये है कि या सूत्रमें ज्योतिषीनिकोही मनुष्यलोकतैं बाहिर

अवस्थितपणों कह्यो है । उत्तर-पूर्वसूत्रमें नृलोके पद है ताकाही अर्थका वशतैं विभक्तिको परिणमन होय नृलोकात् ऐसो अनुवृत्तिरूप भयो है तातैं जानिये है । वार्तिक—

नृलोके नित्यगतिवचनादन्यत्रावस्थानसिद्धिरिति चेन्नोभयासिद्धेः ॥ १ ॥ टीका— स्यान्मतं नृलोके नित्यगतय इत वचनादन्यत्रावस्थानं ज्योतिषां सिद्धं अतो व हरवस्थिता इति वचनमनर्थकमिति तन्न किं कारणमुभयासिद्धेः. नृलोकादन्यत्र बहिर्ज्योतिषामस्तित्वमवस्थानं चासिद्धं अतस्तदुभयसिद्ध्यर्थं बहिरवस्थिता इत्युच्यते असतिहि वचने नृलोके एव सन्ति नित्यगतयश्चेत्यवगम्येत ।

अर्थ—प्रश्न नृलोके नित्यगतय. ऐसा पूर्व सूत्रमें वाक्य है । तातैं अन्यत्र ज्योतिषीनि को अवस्थान सिद्ध है । यातैं बहिरवस्थिता ऐसो वचन जो है सो अनर्थक है ॥ उत्तर—सो नहीं है ॥ प्रश्न कहा कारण? । उत्तर—ऐसे माने दोऊनिकी ही अप्रसिद्धि होय है यातैं क्योंकि मनुष्यलोकतैं अन्यत्र बाहिर ज्योतिषीनिको अस्तित्व अर अवस्थान ए दोउही अप्रसिद्ध है यातैं दोऊनिकी सिद्धिके अर्थ बहिरवस्थिता ऐसैं कहिये है । अर निश्चयकरि या वचनतैं नहीं होतां संतां मनुष्यलोक के विषैही है अर नित्यगतिमान है ऐसे ही जानिये ॥१॥१५॥

श्रीमद्विद्यानन्दिविरचित—

तत्वार्थ श्लोकवार्तिक अध्याय ४ में ज्योतिष्क देवताओंके वर्णन.

ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥१२॥

ज्योतिष एव ज्योतिष्काः को वा यावादेरिति स्वार्थिकः कः । ज्योतिःशब्दस्य यावादिषु पाठात् तथाभिधानदर्शनात् प्रकृतिलिंगानुवृत्तिः कुटीरः समीर इति यथा । सूर्याचन्द्रमसा इत्यत्रानङ् देवताद्वंद्वत्वे ।

ग्रहनक्षत्रप्रकीर्णकतारका इत्यत्र नानङ् । ननु द्वन्द्वग्रहणात्तस्येष्टविषये व्यवस्थानादसुरादिवत् किंनरादिवच्च । कथं ज्योतिष्काः पंचविकल्पाः सिद्धा इत्याह—

ज्योतिष्काः पंचधा दृष्टाः सूर्याद्या ज्योतिराश्रिताः ।
नामकर्मवशात्तादृक् संज्ञा सामान्यभेदतः ॥ १ ॥

ज्योतिष्कनामकर्मोदये सतीराश्रयत्व ज्योतिष्का इति सामान्यतस्तेषां संज्ञा सूर्यादिनामकर्मविशेषोदयात्सूर्याद्या इति विशेषसंज्ञाः । तएते पंचधापि दृष्टाः प्रत्यक्षज्ञानिभिः साक्षात्कृतास्तदुपदेशाविसंवादान्यथानुपपत्तेः ।

सामान्यतोऽनुमेयाश्च छद्मस्थानां विशेषतः ॥
परमागमसंगम्या इति नादृष्टकल्पना ॥ २ ॥

॥ मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥ १३ ॥

ज्योतिष्का इत्यनुवर्तते । नृलोक इति किमर्थमित्यावेदयति—

निरुक्त्यावासभेदस्य पूर्ववद्व्यभावतः ।
ते नृलोक इतिप्रोक्तमावासप्रतिपत्तये ॥ १ ॥

न हि ज्योतिष्काणां निरुक्त्यावासप्रतिपत्तिर्भवनवास्यादीनामिवास्ति यतो नृलोक इत्यावासप्रतिपत्त्यर्थं नोच्येत । क्व पुनर्नृलोके तेषामावासाः श्रूयन्ते ?

अस्मात्समाद्धराभागादूर्ध्वं तेषां प्रकाशिताः ॥
आवासाः क्रमशः सर्वज्योतिषां विश्ववेदिभिः ॥ २ ॥
योजनानां शतान्यष्टौ हीनानि दशयोजनैः ॥
उत्पत्य तारकास्तावच्चरन्त्यध इतिश्रुतिः ॥ ३ ॥
तट सूर्या दशोत्पत्य योजनानि महाप्रभाः ॥
ततश्चंद्रमसोऽशीति भानि त्रीणि ततस्त्रयः ॥ ४ ॥
त्रीणित्रीणि बुधाः शुक्रा गुरवश्चोपरिक्रमात् ॥
चत्वारोंगारकास्तद्वच्चत्वारिच शनैश्चराः ॥ ५ ॥

अवस्थितपणों कह्यो है । उत्तर-पूर्वसूत्रमें नृलोके पद है ताकाही अर्थका वशतें विभक्तिको परिणमन होय नृलोकात् ऐसो अनुवृत्तिरूप भयो है तातें जानिये है । वार्तिक—

नृलोके नित्यगतिवचनादन्यत्रावस्थानसिद्धिरिति चेन्नोभयासिद्धेः ॥ १ ॥ टीका— स्यान्मतं नृलोके नित्यगतय इत वचनादन्यत्रावस्थानं ज्योतिषा सिद्धं अतो न हावस्थिता इति वचनमनर्थकमिति तन्न किं कारणमुभयासिद्धे. नृलोकादन्यत्र बहिर्ज्योतिषामस्तित्वमवस्थानं चाप्रसिद्धं अतस्तदुभयसिद्धयर्थं बहिरवस्थिता इत्युच्यते असतिहि वचने नृलोके एव सन्ति नित्यगतयश्चेत्यवगम्येत ।

अर्थ—प्रश्न नृलोके नित्यगतय ऐसा पूर्व सूत्रमें वाक्य है । तातैं अन्यत्र ज्योतिषीनि का अवस्थान सिद्ध है । यातैं बहिरवस्थिता ऐसो वचन जो है सो अनर्थक है ॥ उत्तर—सो नहीं है ॥ प्रश्न कहा कारण? । उत्तर-ऐसे माने दोऊनिको ही अप्रसिद्धि होय है यातैं क्योंकि मनुष्यलोकतैं अन्यत्र बाहिर ज्योतिषीनिको अस्तित्व अर अवस्थान ए दोऊही अप्रसिद्ध है यातैं दोऊनिकी सिद्धिकै अर्थ बहिरवस्थिता ऐसे कहिये है । अर निश्चयकरि या वचनमैं नहीं होतां संतां मनुष्यलोक के विषैही है अर नित्यगतिमान है ऐसे ही जानिये ॥१॥१५॥

श्रीमद्विद्यानन्दिविरचित—

तत्त्वार्थ श्लोकवार्तिक अध्याय ४ में ज्योतिष्क देवताओंके वर्णन.

ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥१२॥
ज्योतिष एव ज्योतिष्काः को वा यावादेरिति स्वार्थिक. कः । ज्योति शब्दस्य यावादिषु पाठात् तथाभिधानदर्शनात् प्रकृतिलिंगानुवृत्तिः कुटीर, समीर इति यथा । सूर्याचन्द्रमसा इत्यत्रानङ् देवताद्वंद्वत्वे ।

प्रइनक्षत्रप्रकीर्णकनामका इत्यत्र नानद् । नतु द्वन्द्वग्रहणात्स्येष्टविषये व्यवस्थानादसुरादिवत् किंनरादिवच्च । कथं ज्योतिष्काः पंचविकल्पाः सिद्धा इत्याह—

ज्योतिष्काः पंचधा दृष्टाः सूर्याद्या ज्योतिराश्रिताः ।
नामकर्मवशात्तादृक् संज्ञा सामान्यभेदतः ॥ १ ॥

ज्योतिष्कनामकर्मोदये सतीराश्रयाव पज्योतिष्का इति सामान्यतस्तेषां संज्ञा सूर्यादिनामकर्मविशेषोदयात्सूर्याद्या इति विशेषसंज्ञा । तएते पंचधा प्र दृष्टाः प्रत्यक्षज्ञ निभिः माक्षात्कृतास्तदुपदेशाविसंवादान्यथानुपपत्ते.।

सामान्यतोऽनुमेयाश्च छद्मस्थानां विशेषतः ॥
परमागमसगम्या इति नादृष्टकल्पना ॥ २ ॥

॥ मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥ १३ ॥

ज्योतिष्का इत्यनुवर्तते । नृलोक इति किमर्थमित्यावेदयति—

निरुक्त्यावासभेदस्य पूर्वस्त्रुत्यभावतः ।
ते नृलोक इतिप्रोक्तमावासप्रतिपत्तये ॥ १ ॥

न हि ज्योतिष्काणां निरुक्त्यावासप्रतिपत्तिर्भवनवास्यादीनामिवास्ति यतो नृलोक इत्यावासप्रतिपत्त्यर्थं नोच्येत । क पुनर्नृलोके तेषामावासाः श्रूयन्ते ?

अस्मात्समाद्धराभागादूर्ध्वं तेषां प्रकाशिताः ॥
आवासा क्रमशः सर्वज्योतिषां विश्ववेदिभि ॥ २ ॥
योजनानां शतान्यष्टौ हीनानि दशयोजनैः ॥
उत्पत्य तारकास्तावच्चरन्त्यत्र इतिश्रुति. ॥ ३ ॥
तत सूर्या दशोत्पत्य योजनानि महाप्रभाः ॥
ततश्चंद्रमसोऽशीति भानि त्रीणि ततस्त्रयः ॥ ४ ॥
त्रीणित्रीणि बुधाः शुक्रा गुरवश्चोपरिक्रमात् ॥
चत्वारोंगारकास्तद्वच्चत्वारिच शनैश्चराः ॥ ५ ॥

चरंति तादृशादृष्टविशेषवशवर्तिनः ॥
स्वभावाद्वा तथानादिनिधनाद्द्रव्यरूपतः ॥ ६ ॥
एष एव नभोभागो ज्योतिःसंघातगोचरः ॥
बहलः सदशकं सर्वो योजनानां शतं स्मृतः ॥ ७ ॥
सघनोदधिपर्यंतो नृलोकेऽन्यत्र वा स्थितः ॥
सिद्धस्तिर्यगसंख्यातद्वीपांभोधिप्रमाणकः ॥ ८ ॥
सर्वाभ्यंतरचारीष्टःतत्राभिजिदथो बहिः ॥
सर्वेभ्यो गदितं मूलं भरण्योधस्तथोदिताः ॥ ९ ॥
सर्वेषामुपरि स्वातिरिति संक्षेपतः कृता ॥
व्यवस्था ज्योतिषां चिंत्या प्रमाणनयवेदिभिः ॥ १० ॥

मेरुप्रदक्षिणा नित्यगतय इति वचनात् किमिष्यत इत्याह—

मेरुप्रदक्षिणा नित्यगतयस्त्विति निवेदनात् ॥
नैवाप्रदक्षिणा तेषां कादाचित्कीष्यते न च ॥ ११ ॥
गत्यभावोपि चानिष्टः यथा भूभ्रमवादिनः ॥
भुवो भ्रमणनिर्णीतिविरहस्योपपत्तितः ॥ १२ ॥

नहि प्रत्यक्षतो भूमेर्भ्रमणनिर्णीतिरस्ति, स्थिरतयैवानुभवात्। नचायं भ्रान्तः सकलदेशकालपुरुषाणां तद्भ्रमतः प्रतीतेः। कस्यचिन्नावादिस्थिरत्वानुभवस्तु भ्रान्तः परेषां तद्भ्रमणानुभवेन बाधनात्। नाप्यनुमानतो भूभ्रमणविनिश्चयः कर्तुं सुशकः तदविनाभाविलिंगाभावात्। स्थिरे भचक्रे सूर्योदयास्तमयमध्याह्नादिभूगोलभ्रमणे अविनाभावलिंगमिति चेन्न, तस्य प्रमाणबाधितविषयत्वात् पावकानौष्ण्यादिषु द्रव्यत्वादिवत्। भचक्रभ्रमणे सति भूभ्रमणमंतरेणापि सूर्योदयादिप्रतीत्युपपत्तेश्च। न तस्मात् साध्याविनाभावनियमनिश्चयः। प्रतिविहितं च प्रपंचतः पुरस्तात् भूगोलभ्रमणमिति न तदवलंबनेन ज्योतिषां नित्यगत्यभावो विभावयितुं शक्यः नापि कादाचित्कीष्यते गतिर्नित्यग्रहणात्। तद्धेतेर्नित्यत्वविशेषणानुप-

पतिर्घोल्यादिति न शंकनीयं, नित्यशब्दस्याभीक्ष्ण्यवाचित्वान्नित्यप्रहसितादिवत् ॥

> ऊर्ध्वाधोभ्रमणं सर्वज्योतिषां ध्रुवतारकाः ॥
> मुक्त्वा भूगोलकादेवं प्राहुर्भूभ्रमवादिनः ॥ १३ ॥
> तदप्यपास्तमाचार्यैर्नृलोक इति सूचनात् ॥
> तत्रैव भ्रमणं यस्मान्नोर्ध्वाधोभ्रमणे सति ॥ १४ ॥

घनोदधेः पर्यंते हि ज्योतिर्गणगोचरे सिद्धे त्रिलोक एव भ्रमणं ज्योतिषामूर्ध्वाधः कथमुपपद्यते ? भुविदारणप्रसंगात् , तत एव विंशत्युत्तरैकादश योजनशतविष्कंभत्वं भूगोलस्याभ्युपगम्यत इतिचेत्, उत्तरतो भूमण्डलस्येयत्तातिक्रमात् तदधिकपरिमाणस्य प्रतीतेः तच्छतभागस्यच सातिरेकैकादशयोजनमात्रस्यैव समभूभागस्याप्रतीतेः कुरुक्षेत्रादिषु भूद्वादशयोजनादिप्रमाणस्यापि समभूतलस्य सुप्रसिद्धत्वात् । तच्छतगुणविष्कंभभूगोलपरिकल्पनायामनवस्थाप्रसंगात् ! कथं च स्थिरेऽपि भूगोले गंगासिंध्वादयो नद्यः पूर्वापरसमुद्रगामिन्यो घटेरन् ? भूगोलमध्यान्तप्रभावादितिचेत्, किं पुनर्भूगोलमध्यं ? उज्जयिनीतिचेत्, न ततो गंगासिंध्वादीनां प्रभवः समुपलभ्यते । यस्मात् तत्प्रभवः प्रतीयते तदेव मध्यमितिचेत्, तदिदमतिव्याहतं। गंगाप्रभवदेशस्य मध्यत्वे सिंधुप्रभवभूभागस्य ततोतिव्यवहितस्य मध्यत्वविरोधात् । स्वबाह्यदेशापेक्षया तस्य मध्यत्वे न किंचिदमध्यं स्यात् स्वसिद्धांतपरित्यागश्चोज्जयिनीमध्यवादिनां । तदपरित्यागे चोज्जयिन्या उत्तरतो नद्यः सर्वा उदङ्मुख्यस्तस्या दक्षिणतोऽवाङ्मुख्यस्तत पश्चिमतः प्रत्यङ्मुख्यस्ततः पूर्वतः प्राङ्मुख्यः प्रतीयेरन् । भूम्यवगाहभेदान्नदीगतिभेद इतिचेत्, भूगोलमध्ये महावगाहप्रतीतिप्रसंगात् । नहि यावानेव नीचैर्देशेवगाहस्तावानेवोर्ध्वभूगोले युज्यते । ततो नदीभिर्भूगोलानुरूपतामतिक्रम्य वहंतीति भोगोलविदाहरणमिति सममेव धरातलमवलंबितुं युक्तं, समुद्रादिस्थितिविरोधश्च तथा परिहृतः

स्यात् । तद्भूमिशक्तिविशेषात्स परिणीयत इति चेन्, तत एव समभूमौ छायाविभेदोऽस्तु । शक्यं हि वक्तुं लङ्काभूमेरीदृशी शक्तिर्यतो मध्याह्ने अवरुच्छाया मान्यखेटपुरभूमेस्तु तादृशी यतस्तत्रस्थिततारतम्यभा छाया । तथा दर्पणसमतलायामपि भूमौ न सर्वेषामुपरि स्थिते सूर्ये छायाविरहस्तस्यास्तद्भेदनिमित्तशक्तिविशेषासद्भावात् तथा विषुमति समरात्रमपि तुल्यमध्यदिने वा भूमिशक्तिविशेषादस्तु । प्राच्यामुदय प्रतीच्यामस्तमय सूर्यस्य तत एव घटते । कार्यविशेषदर्शनाद्धि तस्य शक्तिविशेषानुमानस्याविरोधात् । अन्यथा दृष्टहानेरदृष्टकल्पनायाश्चा-वश्यं भाविनत्वात् । सा च पापीयसी महामोहविजृम्भितमावेदयति । न च वयं दर्पणसमतलामेन भूमिं मन्यामहे प्रतीतिविरोधात् तस्याः कालादि-वशादुपचयापचयसिद्धेर्निम्नोन्नताकारसद्भावात् । ततो नोज्जयिन्या उत्त-रोत्तरभूमौ निम्नायां मध्यंदिने छायावृद्धिर्विरुध्यते । नापि ततो दक्षिण-क्षितौ समुन्नतायां छायाहानिरुन्नतेतराकारभेदद्वाराया शक्तिभेदप्रसि-द्धे । प्रदीपादिवादित्यान्न दूरे छायाया वृद्धिघटनात् निकटे प्रभातो-पपत्ते । तत एव नोदयास्तमययो सूर्यादेर्विपर्यदर्शनं विरुध्यते भूमि-संलग्नतया वा सूर्यादिप्रतीतिर्न सम्भाव्या, दूरादिभूमेस्तथाविधदर्शनजनन-शक्तिसद्भावात् ॥ नन भूमात्रनिबंधना समरात्रादयस्तेषां ज्योतिष्कगति-विशेषनिबंधनत्वादित्यावेदयति—

समरात्र दिनावृद्धिहानिर्दोषाश्च युज्यते ॥
छायाग्रहोपरागादिर्यथा ज्योतिर्गतिस्तथा ॥ १५ ॥
खखण्डभेदतः सिद्धा बाह्याभ्यन्तरमध्यतः ॥
तथाभियोग्यदेवानां गतिभेदात्स्वभावतः ॥ १६ ॥

सूर्यस्य तावच्चतुरशीतिशतं मण्डलानि । तत्र पंचषष्ट्यभ्यंतरे जंबूद्वीपस्या-शीतिशतयोजनैर्मस्तकाद्यप्रकाशनं जंबूद्वीपद्वाह्यमण्डलान्येकान्नविंशतिशत लवणोदस्याभ्यंतरे त्रीणि त्रिंशानि योजनशतान्यवगाह्य तस्य प्रकाशनात् ।

द्वियोजनमेकैकमण्डलान्तरं द्वेयोजने अष्टाचत्वारिंशद्योजनैकषष्ठिभागाश्चै-कैकमुदयान्तरं । तत्र यदा त्रीणि शतसहस्राणि षोडश सहस्राणि सप्त-शतानि च्यधिकानि परिधिपरिमाणं बिभ्रति तुल्यमेषप्रवेशादिगोचरे सर्वमध्यमण्डले मेरुं पंचचत्वारिंशद्योजनैर्द्वाविंशत्या योजनैकषष्ठभा-गैश्च प्राप्य सूर्यः प्रकाशयति तदाहनि पंचदशमुहूर्ता भवंति रात्रौ चेति समरात्रं सिद्ध्यति । विषुमति दिने द्वाविंशत्येकषष्ठिभागः साति-रेकाष्टसप्ततिद्विशतपंचसहस्रयोजनपरिमाणैकमुहूर्तगतिक्षेत्रोपपत्तेः । दक्षि-णोत्तरे समप्रणिधीनां च व्यवहितानामपि जनानां प्राच्यमादित्यप्रती-तिश्च लंकादिकुरुक्षेत्रांतदेशस्थानामभिमुखमादित्यस्योदयात् । अष्टच-त्वारिंशद्योजनैकषष्ठिभागत्वात् प्रमाणयोजनापेक्षया सातिरेकत्रिनवतीयो-जनशतत्रयप्रमाणत्वादुत्सेधयोजनापेक्षया दूरोदयत्वाच्च स्वाभिमुखत्वबुद्धि-प्रतिभाससिद्धेः । द्वितीये अहनि तथा प्रतिभासः कुतो न स्यात्तदविशे-षादिति चेन्न, मण्डलान्तरे सूर्यस्योदयात् तदंतरस्योत्सेधयोज-नापेक्षया द्वाविंशत्येकषष्ठिभागयोजनसहस्रप्रमाणत्वात्, उत्तरायणे त-दुत्तरत प्रतिभासनस्य घटनात् । सूर्यचारणाद्दक्षिणोत्तरसमप्र-णिधिभूभागादन्यप्रदेशे कुतः प्राची सिद्धिरिति चेत्, तदनं-तरमंडले तथा सर्वाभिमुखमादित्यस्योदयादेवेति सर्वमनवद्यं, क्षेत्रा-न्तरेऽपि तथा व्यवहारसिद्धेः । तदेतेन प्राचीदर्शनाद्धरायां गोलाकारता साधनमप्रयोजकमुक्तं तत्र तत्र दर्पणाकारतायामपि प्राचीदर्शनोपपत्तेः । यदा तु सूर्यः सर्वाभ्यन्तरमण्डले चतुश्चत्वारिंशद्योजनसहस्रं द्वाभिश्च योज-नशतैर्विस्तरैर्मेरुमप्राप्य प्रकाशयति तदाहन्यष्टादशमुहूर्ता भवन्ति । चत्वा-रिंशषट्उताधिकनवनवतियोजनसहस्रविष्कंभस्य त्रिगुणसातिरेकपरिधेस्त न्मण्डलस्यैकान्नविंशद्योजनषष्ठिभागाधिकं पंचाशद्द्विशतोत्तरयोजनसहस्र-पंचकमात्रमुहूर्तगतिक्षेत्र प्रसिद्धेः शेषप्रकर्षपर्यंततः प्रभा दिवावृद्धहीन-श्च रात्रौ सूर्यविभेदाद्भ्यंतरमंडलात् सिद्धा । यदा च सूर्यः सर्वबाह्य-मण्डले पंचचत्वारिंशत्सहस्रैस्त्रिभिश्च शतैस्त्रिंशद्योजनानां मेरुमप्राप्य भासयति

तदाहनि द्वादश मुहूर्ताः । षट्यधिकशतषट्कोत्तर योजनशतसहस्रविष्कं-भस्य तत्रिगुणसातिरेकपरिधेः तन्मण्डलस्य पंचदशैकयोजनषष्ठिभागाधि-कपंचोत्तरशतत्रयसहस्रपंचकपरिमाणगतिमुहूर्तक्षेत्रत्वावशेषा परमप्रकर्षपर्य-न्तप्राप्ता तावत्दिवाहानिर्वृद्धिश्च रात्रौ सूर्यगतिभेदात् बाह्याद्गगनखण्डम-ण्डलात् सिद्धा । मध्ये त्वनेकविधा दिनस्य वृद्धिर्हानिश्चानेकमण्डलभेदात् सूर्यगतिभेदादेव यथागमं मण्डलं यथागणनं च प्रत्येतव्या तथा दोषावृद्धि-र्हानिश्च युज्यते । तदेतेन दिनरात्रिवृद्धिहानिदर्शनाद्भुवो गोलाकारता-नुमानमपास्तं, तस्यान्यथानुपपत्तिवैकल्यादन्यथैव तदुपपत्तेः । तथा छाया महती दूरे सूर्यस्य गतिमनुमापयति अंतिकेऽतिस्वल्पां न पुनर्भू-मेर्गोलकाकारतामिति छायावृद्धिहानिदर्शनमपि सूर्यगतिभेदनिमित्तकमेव । मध्यान्हेकचिच्छायाविरहेऽपि परत्रतद्दर्शनं भूमेर्गोलाकारतां गमयति समभूमौ तदनुपपत्तेरितिचेन्न, तदापि भूमिनिम्नत्वोन्नतत्वविशेषमात्रस्यैव गतेः तस्य च भरतैरावतयोर्दृष्टत्वात् " भरतैरावतयोर्वृद्धिन्हासौ षट्समयाभ्या-मुत्सर्पिण्यवसर्पिणीभ्यां " इति वचनात् । तन्मनुष्याणामुत्सेधानुभ-वायुरादिभिर्वृद्धिन्हासौ प्रतिपादितौ न · भूमेःपरपुद्गलैरिति न मन्तव्यं, गौणशब्दप्रयोगान् मुख्यस्य घटनादन्यथा मुख्यशब्दा-र्थातिक्रमे प्रयोजनाभावात् । तेन भरतैरावतयो· क्षेत्रयोर्वृद्धिन्हासौ मुख्यतः प्रतिपत्तव्यौ, गुणभावतस्तु तत्स्थमनुष्याणामिति तथा वचनं सफ-लतामस्तु ते प्रतीतिश्चानुलंघिता स्यात् । सूर्यस्य ग्रहोपरागेऽपि न भूगो-लच्छायया युज्यते तन्मते भूगोलस्याल्पत्वात् सूर्यगोलस्य चतुर्गुणत्वात् तथा सर्वग्रासग्रहणविरोधात् । एतेन चंद्रच्छायया सूर्यस्य ग्रहणमपास्तं चन्द्रमसोऽपि ततोल्पत्वात् क्षितिगोलचतुर्गुणच्छायावृद्धिघटनाचंद्रगोलवृद्धि-गुणच्छायावृद्धिगुणघटनाद्वा । ततः सर्वग्रासे ग्रहणमविरुद्धमेवेतिचेत् कुतस्त-त्र तथा तच्छायावृद्धिः । सूर्यस्यातिदूरत्वादितिचेन्न, सन्तलभूमावपि तनएव छायावृद्धिभंगात् । कथंच भूगोलादेहरस्थिरे सूर्ये तच्छायाप्राप्तिः प्रतीतिविरोधात् तदा छायाविग्रहप्रसिद्धेर्मध्यंदिनवत् ततः तिर्यक्स्थिते

सूर्ये तच्छायाप्राप्तिरितिचेन्न, गोलात् पूर्वदिक्षु स्थिते रवौ पश्चिमदिगभिमुख-
छायोपपत्तेस्तत्प्राप्त्ययोगात् । सर्वदा तिर्यगेवसूर्यग्रहणसंप्रत्ययप्रसंगात् ।
मध्यंदिने स्वस्योपरि तत्प्रतीतेश्च क्षितिगोलस्याधःस्थिते भानौ चन्द्रे च त-
च्छायया ग्रहणमितिचेन्न, रात्राविव तददर्शनप्रसंगात् । ननुच न तयावरण-
रूपया भूम्यादिछायया ग्रहणमुपगम्यते यद्विकल्पितोयं दोषः । किंतर्हि ? उप-
रागरूपया चंद्रादौ भूम्याद्युपरागस्य चन्द्रादिग्रहणव्यवहारविषयतयोपगमात् ।
स्फटिकादौजपाकुसुमाद्युपरागवत् तत्र तदुपपत्तेरिति कश्चित्; सोऽपि न
सत्यवाक्, तथा सति सर्वदा ग्रहणव्यवहारप्रसंगात् भूगोलात्सर्वदिक्षु स्थितस्य
चन्द्रादेस्तदुपरागोपपत्तेः । जपाकुसुमादेः समंततः स्थितस्य स्फटिकादेस्तदु-
परागवत् । नहि चन्द्रादेः कस्यांचिदपि दिशि कदाचिदव्यवस्थितिर्नाम
भूगोलस्य येन सर्वदा तदुपरागो न भवेत् तस्य ततोतिविप्रकर्षात् कदाचिन्न
भवत्येव प्रत्यासत्त्यतिदेशकाल एव तदुपगमादितिचेत्, किमिदानीं सूर्यादि-
भ्रमणमार्गभेदोभ्युपगम्यते ? बाढमभ्युपगम्यत इतिचेन्न, कथंनानाराशिषु
सूर्यादिग्रहणप्रतिराशिमार्गस्य नियमात् प्रत्यासन्नतमगमार्गभ्रमण एव तद्घ-
टनात् अन्यथा सर्वदाग्रहणप्रसंगस्य दुर्निवारत्वात् । प्रतिराशि प्रतिदिनं च
तन्मार्गस्याप्रतिनियमात् समरात्रदिवसवृद्धिहान्यादिनियमाभावः कुतो
विनिवार्येत ? भूगोलशक्तेरितिचेन्न, उक्तमत्र समायामपि भूमौ तत एव
समरात्रादिनियमोस्त्विति । ततो न भूछायया चंद्रग्रहणं चन्द्रछायया वा
सूर्यग्रहणं विचारसहं । राहुविमानोपरागोत्र चन्द्रादिग्रहणव्यवहार इति
युक्तिमुत्पश्यामः सकलबाधकविकलत्वात् । न हि राहुविमानानि सूर्यादि
विमानेभ्योल्पानि श्रूयन्ते । अष्टचत्वारिंशद्योजनैकषष्ठिभागविष्कंभायामानि
तत्त्रिगुणसातिरेकपरिधीनि चतुर्विंशतियोजनैकषष्ठिभागबाहुल्यानि सूर्यविमा-
नानि, तथा षट्पंचाशद्योजनैकषष्ठिभागविष्कंभ यामानि तत्त्रिगुणसातिरेकपरि
धीन्यष्टाविंशतियोजनैकषष्ठिभागबाहुल्यानि चन्द्रविमानानि, तथैकयोज-
नविष्कंभायामानि सातिरेकयोजनत्रयपरिधीन्यर्धतृतीयधनुःशत बाहुल्यानि
राहुविमानानीति श्रुतेः । ततो न चन्द्रबिंबस्य सूर्यबिंबस्य वार्भग्रहोपरागो

कुंठविषाणत्वदर्शनं विरुध्यते । नाप्यन्यदा तीक्ष्णविषाणत्वदर्शनं स्याद्धन्यते राहुविमानस्यातिवृत्तस्य अर्धगोलकाकृतेः पार्श्वभागेनोपरक्ते समवृत्ते अर्धगोलकाकृतौ सूर्यबिंबे चन्द्रबिंबे तीक्ष्णविषाणतया प्रतीतिघटनात् । सूर्याचन्द्रमसां राहूणां च गतिभेदात् तदुपरागभेदसंभव दृग्ग्रहयुद्धादिवत् । यथैव हि ज्योतिर्गतिः सिद्धा तथा ग्रहोपरागादिः सिद्धा इति स्याद्वादिनां दर्शनं । न च सूर्यादिविमानस्य राहुविमानेनोपरागोऽसंभाव्यः, स्फटिकस्येव स्वच्छस्य तेनासितेनोपरागघटनात् । स्वच्छत्वं पुनः सूर्यादिविमानानां मणिमयत्वात् । तप्ततपनीयसमप्रभाणि लोहिताक्षमणिमयानि सूर्यविमानानि, विमलमृणालवर्णानि चन्द्रविमानानि, अर्कमणिमयानि अंजनसमप्रभाणि राहुविमानानि, अरिष्टमणिमयानीति परमागमसद्भावात् । शिरोमात्रं राहुः सर्पाकारो वेति प्रवादस्य मिथ्यात्वात् तेन ग्रहोपरागानुपपत्तेः वराहमिहरादिभिरप्यभिधानात् । कथं पुनः सूर्यादिः कदाचिद्राहुविमानस्यार्धभागेन महतोपरज्यमानः कुण्ठविषाणः स एवान्यदा तस्यापरभागेनाल्पेनोपरज्यमानस्तीक्ष्णविषाणः स्यादिति चेत्, तदाभियोग्य देवगतिविशेषात्तद्विमानपरिवर्तनोपपत्तेः । षोडशभिर्देवसहस्रैरुह्यन्ते सूर्यविमानानि प्रत्येकं पूर्वदक्षिणोत्तरापरभागात् क्रमेण सिंहकुंजरवृषभतुरंगरूपाणि विकृत्य चत्वारि चत्वारि देवसहस्राणि वहंतीति वचनात् । तथा चन्द्रविमानानि प्रत्येकं षोडशभिर्देवसहस्रैरुह्यन्ते, तथैव राहुविमानानि प्रत्येकं चतुर्भिर्देवसहस्रैरुह्यन्ते इति च श्रुतेः । तदाभियोग्यदेवानां सिंहादिरूपविकारिणां कुतो गतिभेदस्तादृक् इति चेत्, स्वभावत एव पूर्वोपार्जितकर्मविशेषनिमित्तकादिति ब्रूमः । सर्वेषामेवमभ्युपगन्तव्यमवश्यं भावित्वादन्यथा स्वेष्टविशेषव्यवस्थानुपपत्तेः तत्प्रतिपादकस्यागमस्यासंभवद्बाधकस्य सद्भावाच्च । गोलाकारा भूमिः समरात्रादिदर्शनान्यथानुपपत्तेरित्येतद्बाधकमागमस्य स्यैवेति चेत् न, अत्र हेतोरप्रयोजकत्वात् । समरात्रादिदर्शनं हि यदि विप्रद्भूमेर्गोलाकारतायां साध्यायां हेतुस्तदा न प्रयोजकः स्यात् प्रास्मद्भूमेर्गोलाकारतायामपि तदुपपत्तेः । अथ अस्मद्भूमेर्गोलाकारतायां

साध्यायां, तथाप्ययवयोजको हेतुस्तिष्ठतमूगोलाकारतायामपि तद्घटनात् । अथ भूसामान्यस्य गोलाकारतायां साध्यायां हेतुस्तथाप्यगमकस्तिर्यक्-सूर्यादिभ्रमणादिनामर्गोलकाकारतायामपि भूमेः साध्यायां तदुपपत्ते. । समनलायामपि भूमौ ज्योतिर्गतिविशेषात्समरात्रादिदर्शनस्योपपादितत्वाच्च । नातः साध्यसिद्धिः कालात्ययापदिष्टत्वाच्च । प्रमाणबाधितपक्षनिर्देशानंतरं प्रयुज्यमानस्य हेतुत्वेतिप्रसंगात् । ततो नेदमनुमानं हेत्वाभासोत्थं बाधकं प्रवृत्तागमस्य येनास्मादेवेष्टसिद्धिर्न स्यात् ॥

ज्योतिः शास्त्रमतो युक्तं नैतत्स्याद्वादविद्विषाम् ॥
संवादकमनेकान्ते सति तस्य प्रतिष्ठिते ॥ १७ ॥

नहि किंचित्सर्वथैकान्ते ज्योति.शास्त्रे संवादकं व्यवतिष्ठते प्रत्यक्षादिवत् नित्याद्यनेकान्तरूपस्य तद्विषयस्य सुनिश्चितासंभवद्बाधकत्वाभावात् तस्य दृष्टेष्टाभ्यां प्रबाधनात् । तत. स्याद्वादिनामेव तद्युक्तं, सत्यनेकान्ते तत्प्रतिष्ठानात् तत्र सर्वथा बाधकविरहितनिश्चयात् ॥

॥ तत्कृतः कालविभागः ॥ १४ ॥

किंकृत इत्याह—

ये ज्योतिष्काः स्मृता देवास्तत्कृतो व्यवहारतः ॥
कृतः कालविभागोयं समयादिर्न मुख्यतः ॥ १ ॥
तद्विभागास्तथा मुख्यो नाविभागः प्रसिद्ध्यति ॥
विभागरहिते हेतौ विभागो न फले क्वचित् ॥ २ ॥

विभागवान् मुख्य· कालो विभागवत्फलनिमित्तत्वात् क्रियादिवत् । समयावलिकादिविभागव्यवहारकाले लक्षणफलनिमित्तत्वस्य मुख्यकाले धर्मिणि प्रसिद्धत्वात् नाप्याश्रयासिद्ध·, सकलकालवादिनां मुख्यकाले विवादाभावात् तदभाववादिनां तु प्रतिक्षेपात् । गगनादिनानैकान्तिकोऽयं हेतुरिति चेन्न, तस्यापि विभागवदवगाहनादिकार्या-

स्तयौ विभागवत एव निमित्तत्वोपपत्ते । ननु च यद्यवयवभेदो विभागस्तदा नासौ गगनादावस्ति तस्यैकद्रव्यत्वोपगमात् । पटादिवदवयवारभ्यत्वानुपपत्तेश्च ।

अथ प्रदेशवतोपचारो विभागस्तदा कालेऽप्यस्ति, सर्वगतैककालवादिनामाकाशादिवदुपचरितप्रदेशकालस्य विभागवत्त्वोपगमात् । तथा च तत्साधने सिद्धसाधनमिति कश्चित्, परमार्थत एव गगनादेः सप्रदेशत्वनिश्चयात् । तस्य सर्वदावस्थितप्रदेशत्वात् एकद्रव्यत्वाच्च । द्विविधा ह्यवयवाः सदावस्थितवपुषोऽनवस्थितवपुषश्च । गुणवत्तत्र सदावस्थितद्रव्यप्रदेशाः सदावस्थिता एवान्यथा द्रव्यस्यानवस्थितत्वप्रसंगात् । पटादिवदनवस्थितद्रव्यप्रदेशास्तु तंत्वादयोऽनवस्थितास्तेषामवस्थितत्वे पटादीनामवस्थितत्वापत्ते । कादाचित्कत्वस्थैर्यतयावधारितावयवत्वस्य च विरोधात् । तत्र गगनं धर्माधर्मैकजीवाश्चावस्थितप्रदेशाः सर्वे यतोऽवधारितप्रदेशत्वेन वक्ष्यमाणत्वात् प्रदेशप्रदेशिभावस्य च तेषां तैरनादित्वात् । कथमनादीनां गगनादितत्प्रदेशानां प्रदेशप्रदेशिभावः परमार्थपथप्रस्थायी ? सादीनामेव तंतुपटादीनां तद्भावदर्शनात् इति चेत्, कथमिदानीं गगनादितन्महत्त्वादिगुणानामनादिनिधनानां गुणगुणिभाव पारमार्थिकः सिध्येत् ? तेषां गुणगुणिलक्षणयोगात् तथाभाव इति चेत्, तर्हि तत्प्रदेशानामपि प्रदेशिप्रदेशलक्षणयोगात् प्रदेशप्रदेशिभावोऽस्तु । यथैव हि गुणपर्ययवद्द्रव्यमिति गगनादीनां द्रव्यलक्षणमस्ति तन्महत्त्वादीनां च 'द्रव्याश्रया निर्गुणा गुणाः' इति गुणलक्षणं तथावयवानामेकत्वपरिणाम प्रदेशिद्रव्यमिति प्रदेशिलक्षणं गगनादीनामवयुतोऽवयवः प्रदेशलक्षणं तदेकदेशानामस्तीति युक्तस्तेषां प्रदेशप्रदेशिभाव । कालस्तु नैकद्रव्यं तस्य संख्येयगुणद्रव्यपरिणामत्वात् । एकैकस्मिन्लोकाकाशप्रदेशे कालाणोरेकैकस्य द्रव्यस्यानंतपर्यायस्याभ्युपगमे तद्देशपतिद्रव्यस्यानंतस्य परमाण्वादेरनंतपरिणामानुपपत्तेरिति द्रव्यतो भावतो वा विभागवत्त्वे साध्ये कालस्य न सिद्धसाधनं । नापि गगनादिनानैकांतिको हेतु । क्षित्यादि-

निदर्शनं साध्यसाधनविकलमित्यपि न मन्तव्यं तत्कार्यस्यांकुरादेर्विभागवतः प्रतीतेः, क्षित्यादेश्च द्रव्यतो भावतश्च विभागवत्त्वसिद्धेरिति सूक्तं ' विभागरहिते हेतौ विभागो न फले क्वचित् " इति ॥

॥ बहिरवस्थिताः ॥ १५ ॥ (श्रीउमास्वामि)

किमनेन सूत्रेण कृतमित्याह—

बहिर्मनुष्यलोकात्तेऽवस्थिता इति सूत्रतः ॥
तत्रासन्नाव्ययच्छेदः प्रादक्षिण्यमतिक्षतिः ॥ १ ॥

कृतेति शेषः ।

एवं सूत्रचतुष्टयाज्ज्योतिषामरचिंतनम् ॥
निवासादिविशेषेण युक्तं बाधविवर्जनात् ॥ २ ॥

....।...

त्रिलोकसार—

श्रीनेमिचंद्र सैद्धान्तिक विरचित

त्रिलोकसार अध्याय तृतीय-" ज्योतिर्लोकाधिकार प्रतिपादन अधिकार "

हिंदीभाषा अनुवादकार स्वर्गीय पं० प्रवर श्रीटोडरमल्लजी
छा. पु. पृ. ४१–२०४ ॥

तहाँ तारादिकनिका स्थितिस्थान तीन गाथानि करि कहैं हैं—

णउदुत्तर सत्त सए दससीदी चदुदुगे तिय चउक्के ॥
तारिणससिरिक्खबुहा सुक्कगुरंगारमंदगदी ॥ ३३२ ॥
नवत्युत्तर सप्तशतानि दश अशीतिः चतुर्द्विके त्रिकचतुष्के ।
तारेनशशिऋक्षबुधाः शुक्रगुर्वंगारमंदगतयः ॥ ३३२ ॥

अर्थ—निवै अधिक सातसै विषै उपरि दश असी च्यारि दोय स्थानविषै तीन चारि स्थानविषै जाइ क्रमतैं तारा इन शशि ऋक्ष बुध शुक्र गुरु अगार मंदगति तिष्ठे हैं॥ भावार्थ —चित्रापृथ्वीतैं लगाइं सातसै निवैयोजन उपरिलौ तारे हैं। बहुरि तिनतैं दश योजन उपरि इन कहिए सूर्य हैं। बहुरि तिनतैं असी योजन उपरि शशि कहिए चद्रमा है। बहुरि तिनतैं च्यारि योजन ऊपरि ऋक्ष कहिए नक्षत्र हैं। बहुरितिनतैं च्यारि योजन उपरि बुध है। बहुरि तिनतैं तीन योजन उपरि शुक्र है। बहुरि तिनतैं तीन योजन ऊपरि गुरु कहिये बृहस्पति है। बहुरि तितैं तीन योजन उपरि मंदगति कहिए शनैश्चर है। ऐसे ज्योतिषी तिष्ठे हैं॥ ३३२॥

अवसेसाण गहाण णयरीओ उवरि चित्तभूमीदो॥
गंतूण बुहसणीण विचाले होंति णिच्चाओ॥ ३३३॥
अवशेषाणां ग्रहाणां नगर्य उपरि चित्राभूमितः॥
गत्वा बुधशन्योः विचाले भवति नित्याः॥ ३३३॥

अर्थ—अठ्यासी महनिविषैं अब शेष तिनकी नगरी उपरि उपरि चित्रा भमितैं जाइ बुध अर शनैश्चर इन दोऊनकै बीची अंतराल क्षेत्रविषैं शाश्वती हैं॥ ३३३॥

अत्थइ सणी णवसये चित्तादो तारगावि तावदिए॥
जोइसपडलबहल्लं दससहियं जोयणाण सयं॥ ३३४॥
आस्ते शनिः नवशतानि चित्रातः तारका अपि तावतः॥
ज्योतिष्कपटलबाहुल्यं दशसहितं योजनानां शतम्॥ ३३४

अर्थ—शनैश्चर चित्राभूमितैं नवसै योजन उपरि आस्ते कहिए तिष्ठै है। बहुरि तारे हैं तेभी तावत कहिए नवसै योजन पर्यंत तिष्ठे हैं। सो चित्रातैं सातसै निवै योजन उपरि सों लगाए नवसै योजन पर्यंत

ज्योतिषी देवनिका पटलका बाहुल्य कहिए मोटाईका प्रमाण सो दश सहित एकसौ योजन प्रमाण जानना ॥ ३३४ ॥

आगैं प्रकीर्णक तारानिका प्रकार अंतराल निरूपण है—

तारंतरं जहण्णं तेरिच्छेकोससत्तमागो दु ॥
पण्णासं मज्झिमयं सहस्समुक्कस्सयं होदि ॥ ३३५ ॥
तारांतरं जघन्यं तिर्यक् क्रोशसप्तभागस्तु ॥
पंचाशत् मध्यमकं सहस्रमुत्कृष्टकं भवति ॥ ३३५ ॥

अर्थः—तारातैं ताराके वीचि तिर्यगरूप बरोबरिविषै अंतरालजघन्य एक कोशका सातवां भाग, मध्यम पचास योजन, उत्कृष्ट एक हजार योजन प्रमाण हो है ॥ ३३५ ॥

अब ज्योतिषीनिके विमानस्वरूप निरूपै है—

उत्ताणट्ठियगोलगदलसरिसा सव्व जोई सविमाणा ॥
उवरिं सुरणगराणि य जिणभवणजुदाणि रम्माणि ॥३३६॥
उत्तानस्थितगोलकसदृशाः सर्वज्योतिष्कविमानाः ॥
उपरि सुरनगराणि च जिनभवनयुतानि रम्याणि ॥३३६॥

अर्थ—गोलक जो गोलाताका दल कहिए तिस गोलाकौं वीचिमैं सौं विदारि दोय खण्ड करिए तिसविषैं जो एक खण्ड सो उत्तान स्थित कहिए तिस आधा गोलाकों ऊंचा स्थापित किया होय चौडा ऊपरि अर ताकी अणी नीचे ऐसे धऱ्या होय ताका जैसा आकार तिह समान सर्व ज्योतिषीनिके विमान हैं । बहुरि तिन विमाननिके ऊपरि ज्योतिषी देवनिके नगर हैं । ते नगर जिनमंदिरनिकरि संयुक्त हैं । बहुरि रमणीक हैं ॥ ३३६ ॥

आगैं तिन विमाननिका व्यास अर बाहुल्य दोय गाथानिकरि कहै हैं-

जोयणमेकट्ठिकए छप्पण्णठदाल चंदरविवास ॥
सुक्कगुरिदरतियाणं कोसं किंचूणकोस कोसद्धं ॥ ३३७ ॥
योजन एकषष्ठिकृते षट्पंचाशदष्टचत्वारिंशते चंद्ररविन्यासौ ॥
शुक्रगुर्वितरत्रयाणां क्रोशः किंचिदून क्रोशः क्रोशार्धम् ॥ ३३७

अर्थ—एक योजनकों इकसठि भाग करिए तहां छप्पन भाग प्रमाण तौ चंद्रमाके विमानका व्यास है। बहुरि शुक्रका एक कोश, बृहस्पतिका किंचित् ऊन एक कोश, इतर तीन बुध मंगल शनैश्चर इनका आधकोश प्रमाण विमानव्यास जानना ॥ ३३७ ॥

कोसस्स तुरियमवरंतुरिय हियकमेण जाव कोसोत्ति ॥
ताराणं रिक्खाणं कोसं बहुलं तु वासद्धं ॥ ३३८ ॥
क्रोशस्य तुरीयमवरंतुर्याधिक क्रमेण यावत् क्रोश इति ॥
ताराणां ऋक्षाणां क्रोशं बाहुल्यं तु व्यासार्धम् ॥ ३३८ ॥

अर्थ-तारानिका विमाननिका जघन्य व्यास कोशका चौथा भाग प्रमाण है। बहुरि चौथाई अधिक एक कोश पर्यंत जाननां तहां आध-कोश पौणकोश प्रमाण मध्यम व्यास जाननां। एक कोश प्रमाण उत्कृष्ट व्यास जाननां। बहुरि शेष जे नक्षत्र तिनका विमानव्यास एककोश प्रमाण जाननां। बहुरि सर्वविमाननिका बाहुल्य कहिए मोटाईका प्रमाण सो अपने अपने व्यासतैं आधा जाननां ॥ ३३८ ॥

आगैं राहु केतु ग्रहनिका विमान व्यास वा तिनका कार्य वा तिनका अवस्थानकों दोय गाथानिकरि कहैं हैं—

राहु अरिट्ठविमाणा किंचूणं अधोगंता ॥
छम्मासे पव्वते चंदरवीछादयन्ति कमे ॥ ३३९ ॥
राहरिष्टविमानौ किंचिदूनौ योजनं अधोगंतारौ ॥
षण्मासे पर्वान्ते चंद्ररवीछादयतः क्रमेण ॥ ३३९ ॥

अर्थ—राहु अर अरिष्ट कहिए केतु इन दोऊनिके विमान किछू घाटि एक योजन प्रमाण है। बहुरि ते विमान क्रमकरि चद्रमा अर सूर्यका विमानकै नीचै गमन करे हैं। बहुरि छह मास भए पर्वका अन्तविषै चंद्रमा सूर्यकों आछादे है। राहु तौ चंद्रमाकौं आछादे है, केतु सूर्यकौं आछादे है याका ही नाम ग्रहण कहिए हैं॥ ३३९॥

राहुअरिट्ठविमाणधयादुवरिपमाणअंगुलचउक्कं॥
गतुण ससिविमाणा सूरविमाणा कमे होंति॥ ३४०॥
राव्हारिष्टविमानध्वजादुपरिप्रमाणांगुलचतुष्कम्॥
गत्वा शशिविमानाः सूर्यविमानाः क्रमेण भवन्ति॥ ३४०॥

अर्थ— राहु अर केतुके विमाननिका जो ध्वजादण्ड ताके ऊपरि च्यारि प्रमाणांगुल जाइ क्रम करि चंद्रमाके विमान अर सूर्यके विमान हैं। राहु विमानकै ऊपरि चंद्रमा विमान है केतु विमानकै ऊपरि सूर्य विमान है॥ ३४०॥

आगे चंद्रादिकनिकै किरणनिका प्रमाण कहे हैं—

चंदिणवारसहस्सा पादा सीयल खरा य सुक्के दु॥
अड्ढाइज्जसहस्सा तिव्वा सेसा हु मन्दकरा॥ ३४१॥
चद्रेनयोः द्वादशसहस्राः पादाः शीतलाः खराश्च शुक्रे तु॥
अर्धतृतीयसहस्राः तीव्राः शेषा हि मन्दकराः॥ ३४१॥

अर्थ— चंद्रमा अर सूर्य इनके बारह बारह हजार किरण हैं। तहां चंद्रमाके किरण शीतल हैं सूर्यके किरण खर कहिये तीक्ष्ण हैं। बहुरि शुक्र है ताके अढाई हजार किरण है ते तीव्र कहिए प्रकाशकरि उज्वल हैं। बहुरि अवशेष ज्योतिषी मंदकरा कहिए मंद प्रकाश संयुक्त हैं॥ ३४१॥

आगें चंद्रमाका मण्डलकी वृद्धिहानिका अनुक्रमकूं कहै है—

चदाणयसोलसमं किण्हो सुको य पण्णरदिणोत्ति ॥
हेट्ठिह णिञ्च राहूगमणविसेसेण वा होदि ॥ ३४२ ॥
चंद्रो निजषोडशकृष्णः शुक्लश्च पंचदशदिनान्तम् ॥
अधस्तन नित्य राहुगमनविशेषेण वा भवति ॥ ३४२ ॥

अर्थ—चन्द्रमण्डल है सो अपना सोलहवां भाग प्रमाण कृष्ण अर शुक्ल पंद्रह दिन पर्यंत हो है। भावार्थ—चंद्र विमानका जो सोल्ह भाग विषैं एक एक भाग एक एक विषैं श्वेतरूप होइ स्वयमेव पंद्रह दिन पर्यंत परिनमैं हैं। तहां चंद्रमाका विमानका क्षेत्र योजनका छप्पन एकसठिवां भाग प्रमाण $\frac{५६}{६१}$ है तो एक कलाका केता होइ। ऐसे ताकों सोल्हका भाग दिए आठ करि अपवर्तन किए योजनका एक सौ बाईस भाग करि तामें सात भाग प्रमाण एक कलाका प्रमाण आया $\frac{७}{१२२}$। बहुरि एक कलाका $\frac{७}{१२२}$ प्रमाण होइ तो सोल्ह कलानिका केता होइ ऐसे दोय का अपवर्तन करि गुणे छप्पन इकसठिवां भाग प्रमाण आवै। बहुरि अन्य कोई आचार्यानके अभिप्रायकरि चंद्रविमानकै नीचे राहु विमान गमन करै है तिस राहुका सदाकाल ऐसा ही गमन विशेष है जो एक एक कला चंद्रमाकी क्रमतें आछादे वा उघाडै है तिहकरि वृद्धि हानि है ॥ ३४२ ॥

आगें चंद्रादिकनिके वाहक कहिए चलावनेवाले देव तिनका आकार विशेष वा तिनकी संख्या कहैं हैं—

सिंहगयवसहजडिलस्सायारसुरा वहंति पुव्वादिं ॥
इंदु खीणं सोलसमसहस्समद्धद्धमिदरतिये ॥ ३४३ ॥
सिंहगजवृषभजटिलाश्वाकारसुरा वहंति पूर्वादिम् ॥
इंदुरवीणां षोडशसहस्राणि तदर्धार्धक्रममितरत्रये ॥ ३४३ ॥

अर्थ— सिंह हाथी वृषभ जटिलरूप आकारकों धारि देव हैं ते विमाननिकों पूर्व्वादि दिशानि प्रति वहंति कहिये वेह चालें हैं । ते देव चंद्रमा अर सूर्य इनके तौ प्रत्येक सोलह हजार हैं । बहुरि इतर तीनके आधे आधे हैं तहां ग्रहनिके आठ हजार नक्षत्रनिके च्यारि हजार तारानिके दोय हजार विमानवाहक देव जाननें ॥ ३४३ ॥

आगें आकाशविर्षें गमन करतें जे केइ नक्षत्र तिनके दिशाभेद कहै हैं ।—

उत्तरदक्खिण उड्ढाधोमज्झे अभिजि मूल सादी य ॥
भरणी कित्तिय रिक्खा चरंति अवराणमेव तु ॥ ३४४ ॥
उत्तरदक्षिणोर्ध्वाधोमध्ये अभिजिन्मूलः स्वातिश्च ॥
भरणी कृत्तिका ऋक्षाणि चरंति अवराणामेवं तु ॥३४४॥

अर्थ—उत्तर १ दक्षिण १ ऊर्ध्व १ अधः १ मध्यः १ इन विर्षें क्रमतें अभिजित १ मूल १ स्वाति १ भरणी १ कृत्तिका ए पंच नक्षत्र गमन करै हैं। अवराणं कहिए क्षेत्रांतरकों प्राप्त भए जे अभिजित आदि पंच नक्षत्र तिनकी ऐसी अवस्थिति है ॥ ३४४ ॥

आगें मेरुगिरितैं कितने दूर कैसे गमन करैहैं—

इगिवीसेयारसयं विहाय मेरुं चरंति जोइगणा ॥
चंदतियं वज्जित्ता सेसा हु चरन्ति एक्कपहे ॥ ३४५ ॥
एकविंशैकादशशतानि विहाय मेरुं चरंति ज्योतिर्गणाः ॥
चन्द्रत्रयं वर्जयित्वा शेषा हि चरंति एकपथे ॥ ३४५ ॥

अर्थ—इकईस अधिक ग्यारहसैं योजन मेरुको छोड़ि ज्योतिषी समूह गमन करै हैं। भावार्थः—मेरुगिरितैं ग्यारहसै इकइस योजन ऊपरै ज्योतिषी मेरुकी प्रदक्षिणारूप गमन करैहैं। मेरुतैं ग्यारहसै इकईस योजन पर्यंत कोऊ ज्योतिषी न पाइए हैं। बहुरि चंद्रमा सूर्य ग्रह इन तीन

बिना अवशेष सर्व ज्योतिषी एक पथविषैं गमन करै हैं। भावार्थ—चंद्रमा सूर्य ग्रह ये तौ कदाचित् कोई कदाचित् कोई परिधिरूप मार्गविषै भ्रमण करै हैं। बहुरि नक्षत्र अर तारे ए अपना अपना एकही परिधिरूप मार्गविषै गमन करै हैं। अन्य अन्य मार्गविषैं नहीं भ्रमण करै हैं ॥ ३४५ ॥

अब जंबूद्वीपतें लगाय पुष्करार्ध पर्यंत चंद्रमा सूर्यनिका प्रमाण निरूपै है—

दो दोवग्गं बारस बादाल बहत्तरिंदुइणसखा ॥
पुक्खरदलोत्ति परदो अवट्ठिया सव्वजोइगणा ॥ ३४६ ॥
द्वौ द्विवर्गं द्वादश द्वाचत्वारिंशद्वासप्ततिरिंद्विनसंख्या ॥
पुष्करदलांतं परतः अवस्थिताः सर्वज्योतिर्गणाः ॥ ३४६ ॥

अर्थ—दोय दोय वर्ग बारह बियालीस बहत्तरि चंद्रमा सूर्यनिकी संख्या पुष्कार्ध पर्यंत है। भावार्थ—जंबूद्वीपविषैं दोय लवण समुद्रविषैं च्यारि घातुकी खण्डविषैं बारह कालोदकविषैं बियालीस पुष्करार्धविषैं बहत्तरि चद्रमा है। अर इतने इतने ही सूर्य है। बहुरि पुष्करार्द्धतैं परैं जे ज्योतिषी देवनिका गण है ते अवस्थित है। कदाचित अपनें अपनें स्थानतैं गमन नाहीं करै है जहां है तहां ही स्थिररूप तिष्ठै है ॥ ३४६ ॥

आगैं तहा स्थिर हैं जु ध्रुव तारे तिनकौं निरूपै हैं—

छकदि णवतीससय दसयसहस्स खगार इगिदाल ॥
गयणतिदुगवेगण्ण थिरतारा पुक्खरदलोत्ति ॥ ३४७ ॥
षट्कृतिः नवत्रिंशशतं दशकसहस्रं सद्वादश एकचत्वारिंशत् ॥
गगनत्रिद्विकत्रिपंचाशत् स्थिरताराः पुष्करदलांतम् ॥ ३४७ ॥

अर्थ—छहकी कृति ३६ अर गुणतालीस अधिक सौ १३९ अर दश अधिक हजार १०१० अर बिंदी बारह इकतालीस ४११२० अर बिंदी तीन दोय तरेपन ५३२३० इतने पुष्करार्ध पर्यंत स्थिर तारे हैं।

भावार्थ—जंबूद्वीपविषैं छत्तीस लवण समुद्रविषैं एक सौ गुणतालीस धातकी खण्डविषैं एक हजार दश कालोदकविषैं इकतालीस हजार एक सौ बीस पुष्करार्धविषैं तरेपन हजार दोयसै तीस ध्रुवतारे हैं। ते कवहूं अपने स्थानतैं गमन नाहीं करै हैं। जहांके तहां स्थिररूप रहे हैं॥ ३४७॥

आगैं ज्योतिषी समूहनिके गमनका क्रम विचारैं हैं—

सगसगजोइगणद्धं एक्के भागह्मि दीवउवहीणं॥
एक्के भागे अद्धं चरंति पंतिक्कमेणेव॥ ३४८॥
स्वकस्वकीयज्योतिर्गणार्धं एकस्मिन् भागे द्वीपोदधीनाम्॥
एकस्मिन् भागे अर्ध चरंति पंक्तिक्रमेणैव॥ ३४८॥

अर्थ—अपनां अपनां ज्योतिषी गणका अर्ध तो दीप समुद्रनिका एक भागविषैं अर एक भागविषैं पंक्तिका अनुक्रमकरि विचरैं हैं।

भावार्थ-जिस द्वीप वा समुद्रविषैं जेते ज्योतिषी हैं तिनविषैं आधे ज्योतिषी तौ तिह द्वीप वा समुद्र का एक भागविषैं गमन करैं हैं आधे एक भाग विषैं गमन करै हैं। ऐसे पंक्ति लिएं गमन जाननां॥३४८॥

आगैं मानुषोत्तर पर्वततैं परे चंद्रमा सूर्यनिके अवस्थानका अनुक्रम निरूपैं हैं-

मणुसुत्तरसेलादो वेदिपमूलादु दीवउवहीणं॥
